শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭০

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পৰব্ৰহ্মণে নমঃ
শ্ৰীমতে ৰামানুজায নমঃ

# ॥শ্ৰীমন্নাৰাযণীযম্ ॥

## দশক - ৭০

*সুদৰ্শনশাপমোক্ষৱৰ্ণনং শঙখচূডাৱধৱৰ্ণনং
ৱৃষভাসুৰৱধৱৰ্ণনং চ*

ইতি ত্বযি ৰসাকুলং ৰমিতৱল্লভে ৱল্লৱাঃ
কদাপি পুৰমম্বিকাকমিতুৰম্বিকাকাননে।
সমেত্য ভৱতা সমং নিশি নিষেৱ্য দিৱ্যোতসৱং
সুখং সুষুপুৰগ্ৰসীদ্ৱ্ৰজপমুগ্ৰনাগস্তদা॥ ১ ॥

সমুন্মুখমথোল্মুকৈৰভিহতেপি তস্মিন্ বলা-
দমুঞ্চতি ভৱতপদে ন্যপতি পাহি পাহীতি তৈঃ।
তদা খলু পদা ভৱান্ সমুপগম্য পস্পৰ্শ তং
বভৌ স চ নিজাং তনুং সমুপসাদ্য ৱৈদ্যাধৰীম্॥ ২ ॥

সুদৰ্শনধৰ প্ৰভো ননু সুদৰ্শনাখ্যোস্ম্যহং
মুনীন্ ক্ৱচিদপাহসং ত ইহ মাং ৱ্যধুৰ্ৱাহসম্।
ভৱতপদসমৰ্পণাদমলতাং গতোস্মীত্যসৌ
স্তুৱন্ নিজপদং যযৌ ৱ্ৰজপদং চ গোপা মুদা॥ ৩ ॥

কদাপি খলু সীৰিণা ৱিহৰতি ত্বযি স্ত্ৰীজনৈ-
ৰ্জহাৰ ধনদানুগঃ স কিল শঙখচূডোবলাঃ।
অতিদ্ৰুতমনুদ্ৰুতস্তমথ মুক্তনাৰীজনং
ৰুৰোজিথ শিৰোমণিং হলভৃতে চ তস্যাদদাঃ॥ ৪ ॥

দিনেষু স সুহৃজ্জনৈসসহ ৱনেষু লীলাপৰং
মনোভৱমনোহৰং ৰসিতৱেণুনাদামৃতম্।
ভৱন্তমমৰীদৃশামমৃতপাৰণাদাযিনং
ৱিচিন্ত্য কিমু নালপন্ ৱিৰহতাপিতা গোপিকাঃ॥ ৫ ॥

ভোজৰাজভৃতকস্ত্বথ কশ্চিত
  কষ্টদুষ্টপথদৃষ্টিৰৰিষ্টঃ।
নিষ্ঠুৰাকৃতিৰপষ্ঠু নিনাদ-
  স্তিষ্ঠতে স্ম ভৱতে বৃষৰূপী॥ ৬ ॥

শাক্বৰোথ জগতীধৃতিহাৰী
  মূৰ্তিমেষ বৃহতীং প্ৰদধানঃ।
পঙক্তিমাশু পৰিঘূৰ্ণ্য পশূনাং
  ছন্দসাং নিধিমৱাপ ভৱন্তম্॥ ৭ ॥

তুঙগশৃঙগমুখমাশ্বভিযন্তং
  সঙগৃহয্য ৰভসাদভিযং তম্।
ভদ্ৰৰূপমপি দৈত্যমভদ্ৰং
  মৰ্দযন্নমদযঃ সুৰলোকম্॥ ৮ ॥

চিত্ৰমদ্য ভগৱন্ বৃষঘাতাত
  সুস্থিৰাজনি বৃষস্থিতিৰুৰ্ৱ্যাম্।
ৱৰ্ধতে চ বৃষচেতসি ভূযান
  মোদ ইত্যভিনুতোসি সুৰৈস্ত্বম্॥ ৯ ॥

ঔক্ষকাণি পৰিধাৱত দূৰং
  ৱীক্ষ্যতামযমিহোক্ষৱিভেদী।
ইত্থমাত্তহসিতৈঃ সহ গোপৈ-
  ৰ্গেহগস্ত্বমৱ ৱাতপুৰেশ॥ ১০ ॥

**********